# गुरुस्तोत्रम्

समाश्रयेद् गुरुं भक्त्या महाविश्वासपूर्वकम् ।
निक्षिपेत् सर्वभारांश्च गुरोः श्रीपादपङ्कजे ॥१॥

गुरुरेव परो धर्मो गुरुरेव परा गतिः ।
गुरुरेव परो बन्धुर्गुरुरेव परः स्मृतः ॥२॥

गुरुरेव महापापं क्षपयत्यात्मभावतः ।
'श्रीगुरुभ्यो नम' इति गुरुमन्त्रं जपेत यः ॥३॥

गुरुभक्त्या विनाशः स्याद्दोषस्यापि गरीयसः ।
भविष्यति नवेत्येवं सन्दिग्धो(ग्धे) निरयं व्रजेत् ॥४॥

गुरुपादाम्बुजं ध्यायेद् गुरोर्नाम सदा जपेत् ।
गुरोर्वार्तां तु कथयेद् गुरोरन्यं न भावयेत् ॥५॥

गुरुपादौ च शिरसा मनसा वचसा तथा ।
यः स्मरेत्सततं भक्त्या सन्तुष्टस्तस्य केशवः ॥६॥

हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
गुरुप्रसादात् सर्वेष्टसिद्धिर्भवति नान्यथा ॥७॥

गुरुसंस्मरणं कार्यं सर्वदैव मुमुक्षुभिः ।
उत्थाने भोजने स्नाने ग्रन्थारम्भे विशेषतः ॥८॥

गुरुप्रसादो बलवान् न तस्माद् बलवत्तरम् ।
यद्गुरुः सुप्रसन्नः सन् दद्यात् तन्नान्यथा भवेत् ॥९॥

शुभान् ध्यायन्ति ये कामान् गुरुदेवप्रसादजान् ।
इतरानात्मपापोत्थान् तेषां विद्या फलिष्यति ॥१०॥

स्मृत्वा गुरुं पूर्वगुरुमादिमूलगुरूंस्तथा ।
देवतां वासुदेवं च विद्याभ्यासी तु सिद्धिभाक् ॥११॥

ज्ञानादृते नैव मुक्तिर्ज्ञानं नैव गुरोर्विना ।
तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ॥१२॥

तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः ।
अमाययानुवृत्या च तुष्येदात्मात्मदो हरिः ॥१३॥

अहोभाग्यमहोभाग्यं गुरुपादानुवर्तिनाम् ।
ऐहिकामुष्मिकं सौख्यं वर्धते तदनुग्रहात् ॥१४॥

अहो दौर्भाग्यमतुलं विमुखानां हरौ गुरौ ।
ऐहिकं ह्रसते सौख्यं दुःखं नारकमेधते ॥१५॥

यद्यत् सत्कृत्यजं पुण्यं तत्सर्वं गुरवेऽर्पयेत् ।
तेन तत् सफलं प्रोक्तमन्यथा निष्फलं भवेत् ॥१६॥

गुरुर्गुरुर्गुरुरिति जपतो नास्ति पातकम् ।
तस्माद् गुरुप्रसादार्थं यतेत मतिमान्नरः ॥१७॥

गुरोः सेवा गुरोः स्तोत्रं शिष्यकृत्यं परं स्मृतम् ।
दोषदृष्टिरनर्थायेत्युमामाह सदाशिवः ॥१८॥

अहोभाग्यमहोभाग्यं मध्वमार्गानुयायिनाम् ।
दैवं रमापतिर्येषां यद्गुरुर्भारतीपतिः ॥१९॥

सर्वधर्मान् परित्यज्य गुरुधर्मान् समाचर ।
न गुरोरधिकं किञ्चित् पुरुषार्थचतुष्टये ॥२०॥

साधनं विद्यते देवि गुरोराज्ञां न लङ्घयेत् ।
देहदात्पितुरेवायं ह्यधिको ज्ञानदानतः ॥२१॥

पिता माता तथा भ्राता सर्वे संसारहेतवः ।
गुरुरेकः सदा सेव्यः संसारोद्धरणक्षमः ॥२२॥

गुरुभक्तः सदा सेव्यो गुरुभक्तस्य दर्शने ।
मनो मे गाहते देवि कदा द्रक्ष्ये गुरुप्रियम् ॥२३॥

सर्वे धर्माः कृतास्तेन सर्वतीर्थानि तेन च ।
यस्य स्याद् गुरुवाक्येषु भक्तिः सर्वोत्तमोत्तमा ॥२४॥

शरीरं वसु विज्ञानं वासः कर्म गुणानसून् ।
गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृतः ॥२५॥

आचार्यस्य प्रियं कुर्याद् प्राणैरपि धनैरपि ।
कर्मणा मनसा वाचा स याति परमां गतिम् ॥२६॥

न स्नानसन्ध्ये न च पादसेवनं
हरेर्न चार्चा विधिना मया कृता ।
निष्कारणं मे गतमायुरल्पकं
तस्माद् गुरो मां कृपया समुद्धर ॥२७॥

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ॥२८॥

मादृशो न परः पापी त्वादृशो न दयापरः ।
इति मत्वा जगन्नाथ रक्ष मां शरणागतम् ॥२९॥

कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वानुसृतः स्वभावम् ।
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥३०॥

।। इति श्रीगुरुस्तोत्रम् ।।